International Journal of Sanskrit Research 2020; 6(2): 100-105

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 100-105
© 2020 IJSR
www.anantaajournal.com
Received: 14-01-2020
Accepted: 18-02-2020

**अनुश्रिता मण्डलः**
सहकारिणी अध्यापिका,
संस्कृतविभागः
सुरेन्द्रनाथमहाविद्यालयः,
कलिकाता, पश्चिमवङ्गः, भारत

**Corresponding Author:**
**अनुश्रिता मण्डलः**
सहकारिणी अध्यापिका,
संस्कृतविभागः
सुरेन्द्रनाथमहाविद्यालयः,
कलिकाता, पश्चिमवङ्गः,
भारतम्

# विष्णुस्मृति-विष्णुधर्मोत्तरपुराणयोर्दृष्ट्या स्त्रीणां सामाजिकम् अवस्थानम्

## अनुश्रिता मण्डलः

**सारः**
विष्णुस्मृतौ स्त्रीणां पृथक्तया यज्ञव्रतोपवासविधिर्नासीत्। तत्र स्त्रीणां मुख्यधर्मत्वेन पतिगृहस्थपरिजनानां सेवा ह्युल्लिखिता। तत्र स्त्रीजनं न कदाप्यासीत् स्वतन्त्रम्। सा वाल्यावस्थातो वृद्धावस्थापर्यन्तं कस्यापि अधीने सन्तिष्ठति सर्वकर्मस्वस्वतन्त्रतया। स्मृतौ नारीणामाचारसम्बन्धीयनियमानां विद्यमानत्वेऽपि विदुषीणां शिक्षा-दीक्षादिसम्बन्धीयविषयाणां वर्णनाभावादनुमीयते यदुभययुगे नारीशिक्षा अवहेलिता बभूव।

अपरतो, विष्णुधर्मोत्तरपुराणे उच्यते यत् सतीनार्यः कर्तव्यं तावत् पत्युः उत पुत्रस्य अधीनेन जीवननिर्वाहनम् पत्या समं सहमृत्युवरणमेव वरम् च। अपि चोक्तं विष्णुधर्मोत्तरपुराणे 'नष्टे मृते प्रव्रजिते क्लीवेऽथ पतितेऽपतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते'। स्मृतौ नारी-पुरुषयोरान्तःसम्पर्को निर्णीतो बभूव समाजेनैव। नारीणां पारतन्त्रस्य स्वरूपमिदं वर्तमानयुगमास्थाय वयम् कष्टेनापि कल्पयितुं न शक्नुमः। मृतपत्या समम् अनुगमनेन सतीदाहप्रथा परोक्षतया उल्लिखितेति उभयोर्ग्रन्थयोः। समाजे तदानीमासीत् कन्यकायाः विक्रयप्रथेति विचिन्त्य विष्णुधर्मोत्तरपुराणे कन्यायाः विक्रयो निषिद्धः। अपरतः, गौरीपूजाया उल्लेखः अपि प्राप्यते। अत्रैव स्पष्टं यत् स्त्रीधर्म इत्यनेन नारीणां पातिव्रत्यमेव अवबुध्यते विष्णुस्मृतौ तथा विष्णुधर्मोत्तरपुराणे चेति। अत्रैव स्पष्टं यत् स्त्रीधर्म इत्यनेन नारीणां पातिव्रत्यमेव अवबुध्यते। उभयोः स्त्रीणाम् अवस्थाननिर्णयो हि मम शोधबन्धस्य उद्देश्यम् तथापि परिशेषे वक्तव्यं यदेकविंशशताब्द्याः द्वारप्रान्तमागत्य विष्णुस्मृति-विष्णुधर्मोत्तरपुराणयोः वर्णनानुसारं स्त्रीणां धर्मो युक्तो न वेति भाव्यम् इति संक्षेपः।

## मूलप्रबन्धः

स्मृत्याश्चिरन्तननियमानतिक्रम्य कृत्स्नो विष्णुस्मृतिरिति ग्रन्थः पौराणिकशैल्या वक्तृ-श्रोत्र्योः प्रश्नोत्तरमुखेन लोकशिक्षायै रचितो बभूव। सूत्र-श्लोकाभ्यामन्विता विष्णुस्मृत [1] शतमध्यायैर्विन्यस्ता। अयमन्यतमो धर्मशास्त्रीयो ग्रन्थविशेषः। याज्ञवल्क्यकथितेषु विंशतिसंख्यकेषु धर्मशास्त्रकृत्सु [2] विष्णुरन्यतमः। रचयितृविषये

---

[1]Among the extant *Dharmaśāstras*, the *Vaiṣṇava Dharmaśāstra* commonly known as *Viṣṇusmṛti*, ('The law code of Viṣṇu', Patrick Olivelle, Introduction, p. 3

[2]मन्वत्रिविष्णुहारितयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्वसंवर्ताः कात्यायनवृहस्पती।
पराशरव्यासशङ्खलिखिता दक्षगौतमौ। शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः।। याज्ञवल्क्यसंहिता, 1.4-5

स्पष्टतया किमपि नोक्तम्। श्लोकानुसारं[3] भगवता विष्णुना कथितमिति कृत्वा भगवान् विष्णुरेव ग्रन्थस्यास्य रचयितेति प्रतीयते[4]। साम्प्रतं प्राप्तो ग्रन्थोऽयं विष्णोरुपदेशमवलम्ब्य ग्रथितः। परं ये च भक्ताः परमवैष्णवाः आसन्, तैः संकलितोऽयं ग्रन्थ इत्यनुमीयते। सूत्रप्राधान्यादपि आधुनिको गवेषकः प्याट्रिक-अलिभेलमहाभागो मन्यते, यत् स्मृतिग्रन्थस्यास्य रचनाकालः षष्ठशतकात् नवमखृष्टाब्दान्तं यावत्। तन्नये अयं ग्रन्थः इतरधर्मशास्त्रवन्नासीत् प्राचीनः। षोडशशतके वाराणस्या नन्दपण्डितः ग्रन्थस्यास्य वैजयन्तीति टीकां ररर्च। अपरतः, विष्णुधर्मोत्तरपुराणं सप्तमशताब्द्याः समकालिकम् उपपुराणमेकम्। विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डस्य आङ्गलानुवादिका Stella Kramrisch-महाभागा ग्रन्थसूचनायां कथितवती यत् विष्णुपुराणं चतुर्थखृष्टपूर्वात् पूर्वं नेति कृत्वा तस्यैव परिशिष्टांशे नाम विष्णुधर्मात्तरपुराणे अजन्तायाः चित्रसूत्रस्य बहुस्थानानां समानमेव वर्णनमासीदिति हेतोः प्रमाणीभवति यत् ग्रन्थोऽयं सप्तमशतके रचितः [5]। Winternitz–महाभागस्य नये सप्तमखृष्टाब्दात् दशमखृष्टाब्दान्तर्वर्तिनि कस्मिंश्चित् काले रचित इत्यनुमीयते[6]।

साधारणतया आचार्यं व्यासं पुराणोपपुराणयोः प्रणेतृत्वेन स्वीक्रियते। प्याट्रिक-अलिभेलमहाभागेन विष्णुस्मृतिरिति तथा पुराणविदा हाजरामहाशयेन विष्णुधर्मोत्तरपुराणञ्चेति उभावेव काश्मीरस्य पाञ्जावप्रदेशस्य वेति प्रमीयते। पुराणयोः आकृतिगतशैली विज्ञानसम्मता शास्त्रीया चेति प्रतिभाति। उभयोर्ग्रन्थयोः विष्णोः परमार्थतापि निरूपिता भवति। विष्णुस्मृतेः श्राद्धविषयिणी आलोचना पुराणेऽपि सामान्यरूपेण उल्लिखितेति कृत्वा उभयोः पौर्वापर्यनिरूपणं आन्तःसम्पर्को चति निर्णीते भवतः।

विस्तीर्णं कालं यावत् भारतस्य समाजविन्यासे शासकाः समाजपतयश्च याश्च नैतिकधारणाः अगृह्णन्, याः परवर्तिकाले क्रमेणैव धर्मशास्त्ररूपेण परिणतिमलभन्। स्मृतिशास्त्रं मूलतः समाजशासनस्य नियमान् निरूपयति। परं पुराणे ते नियमाः कथा-आख्यान-काहिनीमाध्यमेन जनमानसे प्रविशन्ति स्म। तत्र श्रुत्याः समतालमेव तस्मिन् समये प्रचलिताः रीतयः नीतयो विधयश्चापि स्थानमलभन्। यस्य कस्यापि देशस्य कालस्य शास्त्रालोचनायां नारीणाम् अवस्थानं गुरुत्ववहो विषयः। शताब्दीर्यावत् परिमार्जितायां परिवर्धितायाञ्च सत्यां साम्प्रतं धर्मशास्त्रत्वेन प्राप्तायां विष्णुस्मृतौ स्त्रीणामवस्थानं हि मम शोधबन्धस्योद्देश्यम्। स्त्रीधनं केवलं राजधर्म-दायभागयोः प्रसङ्ग एव वर्णितः। स्त्रीधनं साधारणतया केवलाम् अर्थनैतिकीं स्थितिं निदर्शयति। अस्मिन् प्रबन्धे मया विष्णुस्मृतेः विष्णुधर्मोत्तरपुराणस्य च समाजव्यवस्थायां स्त्रीजातेरवस्थानं निरूपयितुम् इष्यते।

मध्ययुगे आभ्यन्तरीणकलहः क्रमेणैव विवृद्धिं गत इति कृत्वा बहिःशत्रूणामाक्रमणेन देशो ध्वस्तोऽभूत्। संस्कृत्या समं नारीणां जीवनविधिर्दृढनिगडेन च निगडितोऽभवद् धर्मशास्त्रेषु पुराणादिषु च। वेदरचनायां संकलने नारीणाम् उल्लेखयोग्या भूमिका वेदसमालोचकैः अङ्गीकृतापि वेदोत्तरकालीने तासां मर्यादा क्रमेणैन ह्रासतां गता। तदा नार्यो मानवत्वेन न कल्पिताः, परं प्रजननयन्त्ररूपेण। स्मृतावपि नारीणाम् इयमवस्था दृश्यते। नारीणां कृते भार्या-पत्नी-कन्या-स्त्री-जायाश्चेति शब्दाः प्रयुज्यन्ते। पुरुषाय पतिर्भर्ता चेति शब्दद्वयं प्रायुजि। स्त्रियो धर्मकर्मणि अंशग्रहणेन न केवलं सम्मानवृद्धिः, परं मानोन्नयनमपि भवति। स्त्री पत्नीत्वेन आख्यायिता तदा। अत्रापि वर्णानुसारं शूद्रपत्नी धर्मकार्यं न करिष्यति। सा उच्यते 'धर्मपत्नी'। यज्ञादिषु स्त्रीशूद्रयोः अधिकारो यथा न स्वीकृतः, तथाहि कोऽपि द्विजः कथमपि शूद्रां पत्नीम् उद्वहति तां च न सम्मानयति। समाजे धर्मपत्न्याः विषये नियमाः शास्त्रे विधिवद्धा। विष्णुस्मृतिकृता 'धर्मस्वामिनः' कृते कोऽपि नियमो न योजितः। पत्नीं प्रति पत्युः करणीयानां कर्मणां विधानमपि स्मार्तैर्न प्रदत्तम्।

विष्णुस्मृतौ स्त्रीणां पृथक्तया यज्ञव्रतोपवासविधिर्नासीत्। पतौ जीविते सति स्त्री उपवासव्रतमाचरति चेत् सा स्वामिनः आयुः हरति नरकं गच्छति च इति वर्ण्यते। तत्र ये पत्युः अनुरूपं कर्म करोति, ताः साध्वीरूपेण स्वीक्रियन्ते। स्वामिनो मृत्योः परं वैधव्यावस्थायामपि ब्रह्मचर्यावलम्बिनी साध्वी स्त्री पुत्रवती अपि सनकादिप्रसिद्धानाम् आबाल्यब्रह्मचारिणामिव स्वर्गं गच्छति। शिक्षायां येषामधिकारो नास्ति, ताः कथं ब्रह्मचर्यं पालयितुमर्हेदिति प्रश्नस्तदानीम्। स्त्रीणां ब्रह्मचर्यपालनादेव कथं स्वर्गे तेषां स्थानं भवितुमर्हेदिति द्वितीयः प्रश्नः। एवं निषेध-अर्थवादमूलककाहिनीभ्यां स्त्रीणां स्वाधीनता क्रमेणैव ह्रसतां गच्छेत्। विष्णुस्मृतौ स्त्रीणां मुख्यधर्मत्वेन पतिगृहस्य परिजनानां सेवा हि उल्लिखिता[7]। विवाहस्तासां कृते वाध्यतामूलकसंस्काररूपेण पर्यवसितोऽभूत्। स्त्रीणां विवाहो हि वैदिकसंस्कारविशेषः, पतिसेवा खलु गुरुगृहे वासतुल्या,

[3] संमृष्टवेश्मासु जितेन्द्रियासु कलिव्यपेतासु विलोलुपासु। धर्मव्यपेक्षासु दयान्वितासु सदा स्थिताहं जगतो विधात्रि॥ विष्णुस्मृति 99/22

[4]The authorship is ascribed to *Viṣṇu* himself. The law code of Viṣṇu, Patrick Olivelle, p-14

[5]"The chapter of the *Vishnudharmottara* dealing with paintings must have been compiled in the seventh century, contemporary with the latest paintings of *Ajantā"*, The *Vishnudharmottara* (part III) Stella Kramrisch, introduction, p.5

[6]The V*ishnudharmottara* was compiled between 628 and 1000 A.D., *History of Indian literature I*, Winternitz, p.580

[7]भर्तुः समानव्रतचरित्वम्। *विष्णुस्मृतिः*, 25.2

गृहकर्म होमरूपा अग्नेः परिचर्येति इति मनुस्मृतिः[8]। अर्थात् द्विजस्योपनयनं यथा संस्कारस्तथैव विवाहो हि कन्यकायाः कृते तद्रूपः। द्विजपुत्राभ्यो ये संस्कारा विहिता आसन्, ते वेदस्य मन्त्रोच्चारणेन ऋद्धाः। एताश्च क्रिया एव स्त्रीणां कृते मन्त्रोच्चारणं विनैव अवश्यकरणीयरूपेण उल्लिखिताः। नियमोऽयं द्विजस्त्रीणां कृते प्रयोज्यः इति भाव्यम्। शूद्राणां प्रसङ्गो नोल्लिखितोऽत्र। अत्रेदमुल्लेख्यं यत् द्विजस्त्रियै केवलं विवाहः समन्त्रकः। पुराणे विष्णुभक्तैः वैदिकमन्त्रेण समम् अष्टांशविशिष्टा द्वादशाक्षरविशिष्टा[9] वेति विष्णुमन्त्राः उच्चारयितव्याः। किन्तु स्त्रियो वैदिकमन्त्रादेर्न ह्युच्चारणस्य अधिकारिण्योऽपि परवर्तिमन्त्रास्ताभिरुच्चारयितव्याः। अत्र स्मार्तविधिना नारीभ्यो मन्त्रोच्चारणस्याधिकारः प्रदत्तः। सामाजिकदृष्ट्या गुरुत्वोपेतोऽयमधिकारः। एते व्रताचाराः पौराणिकविधयो वेति आध्यात्मिकजगता वस्तुजगता च समं नारीणां संयोगं स्थापयन्तीति निश्चप्रचम्।

स्त्रीणां पालनीयानि कर्माणि तावदतिथिपूजनम्, गृहोपकरणद्रव्यानि परिष्कृत्य उपयुक्तस्थाने तच्च स्थापनम्, स्वल्पव्ययः, वशीकरणादिमूलकर्मणि अप्रवृत्तिः, मङ्गलाचारादीनि। किञ्च, तासां निषिद्धं कर्म खलु पत्युः प्रवासयापनावसरे वेशाविन्यासकरणम्, परगृहागमनम्, गवाक्षे अनवस्थानञ्चेति। याज्ञवल्क्यस्मृतौ क्रीडा-शरीरविन्यासयोस्तथा चोत्सवे भागग्रहणस्याकृत्यत्वमुल्लिखितम्। शुक्रनीतावप्ययमेव भावः समुल्लिखितः। नारीणाञ्चारित्रिकसुस्थितिरक्षायै शास्त्रकृतः पतौ प्रवासे स्थिते नीरसजीवनयापनस्य विधानं प्रदत्तम्। यतस्तासां जीवने पतिर्हि केवलं भूषणम्। स्त्रीजीवनं केवलमेव परिवारे समाजे च समर्पितमासीत्तदा। पर्दाप्रथा भारतीये समाजे रामायण-महाभारतकालीने जीवने च प्रचलितासीदिति मन्ये। वस्तुतः, पुरुषाणां कुदृष्टितो रक्षायै विधिरयं मध्ययुगे प्रारभत। लज्जा-शालीनतादयश्च तासां गुणत्वेन कीर्तिताः, परं स्मृतौ प्रथेयमासीदिति नानुमीयते। परं स्त्रीणाम् उच्चैः स्वरक्षेपो नानुचित इति विधानमासीत् तदा। साम्प्रतमयं वादः सम्पूर्णरूपेण नावलुप्तः परं गृहस्था जनाः नारीभिः एव पुष्टा भवन्तीति सत्यम्।

स्मृतौ नारीणामाचारसम्बन्धीयनियमानां विद्यमानत्वेऽपि विदुषीणां शिक्षा-दीक्षादिसम्बन्धीयविषयाणां वर्णनाभावादनुमीयते यदुभययुगे नारीशिक्षा अवहेलिताभवत्। अथवा एतदपि भवितुमर्हो यत् स्त्रियः केवलम् आचारसर्वस्वाः गृहस्थजीवने पारङ्गमाश्चासन् इति विभाव्य तासां जीवनं सार्थकमिति आमनन्ति शास्त्रकाराः। स्मृतौ केवलं रमणीनां गृहस्थजीवनस्य साङ्गोपाङ्गं वर्णनं वरीवर्ति, परं तासां कृते शिक्षाव्यवस्था आसीन्न वेति स्पष्टतया न शक्यवचम्। एतदपि वक्तुमलं यत् तासां वेदपाठे नासीदधिकारः। यत्र वैदिकयुगे अपाला-लोपामुद्रा-विश्ववारादीनां विदुषीणामुल्लेखः प्राप्यते, तासां स्वर्गलाभाय विवाहनामकेनानुष्ठानेन सह सम्बन्धो नासीत्, तत्र तत्परवर्तिकालीनेन धर्मशास्त्रेण सममपि कस्या अपि रमण्याः नाम न संयुक्तम्। ऋतुमती कन्यका पूर्वमेव विवाहसंस्कारेण संस्कृताभवदिति। तदर्थं कन्यायाः पिता आदिष्टो धर्मशास्त्रकृद्भिः। अतः स्पष्टं यत् तदा वाल्यविवाहः आसीत् प्रचलितः। नारीणां विवाहानुमोदितं वयः अत्यधिकं नूनमेवासीत् स्मृतौ। साम्प्रतिककालदृष्टौ सत्यमेव प्रथेयममानविकी घृण्या दण्डार्हा चेति। साम्प्रतिके काले पुरुषाणां तथा नारीणाञ्च विवाहयोग्यं वयःक्रमो यथाक्रमम् अष्टादश एकविंशतिश्चेत्यपि तत्पूर्वमेवाद्यापि समाजस्य बहुत्रैव कन्यादानं विशेषेण भवतीति ।

स्मृतौ कन्यकानां विवाहायोग्यत्वविषये आलोचना वर्तते। असद्वंशीय-चिररोगान्वित-अधिकाङ्गि-हीनाङ्गि-अतिकपिल-बहुभाषिण्यो नार्यो विवाहायोग्या इति स्मृतिकाराः। तदानीं शारीरिकविकारविशिष्टायाः कन्यायाः कृते उपयुक्तपात्रान्वेषणं सत्यमेव वर्तमानकालादपि कष्टवहमासीत्। अलक्षणा कन्यका न हि पुरुषाणां कृते उपयुक्तेति शास्त्रनिषेधो वरीवर्ति। अपरतः, अयोग्यपुरुषस्य केचिन्नियमाः स्मृतौ नोल्लिखिता इति कृत्वा पक्षपातदुष्टा इमे स्मृतिग्रन्था इति मामकी मतिः। परं पुरुषतन्त्रेण पक्षपातदुष्टत्वात् स्मृतिग्रन्थानां गुरुत्वं क्रमेणैव क्षीणताम् एतीति विचार्य पुराणकृद्भिरुक्तं यत् किमपि कारणमृते कश्चन पुरुषो ह्यतिरिक्तां भार्यां ग्रहीतुं नालम् [10] । साध्वीमाहात्म्यमिति अध्याये उच्यते यन्नारी कदापि न भवति पापयुक्ता। समाजे रजःस्वला नारी अपवित्रेति मन्यते। किन्तु पुराणे रजःस्वला नारी पवित्रतमा दुष्कर्मनाशिका चेति वण्यते। यतः प्रतिमासं रजस्तासां दुष्कर्म नाशयति चिराय। नार्यश्चन्द्र-गन्धर्व-अग्निभ्यश्चेति यथाक्रमं शौचतां शिक्षितां वाचं पवित्रताञ्चेति लभन्त इति कृत्वा नारी पवित्रेति। ब्राह्मणा अपि तत्सदृशीं मर्यादां न लब्धुमलम्। स्त्री शुद्धा सर्वस्थलेषु[11]।

विष्णुस्मृतावपि स्त्रीजीवनं न कदापि आसीत् स्वतन्त्रम्। सा बाल्यावस्थातो वृद्धावस्थापर्यन्तं कस्यापि अधीनासीत् – सर्वकर्मस्वस्वतन्त्रता [12] । सर्वकर्मस्वपि स्त्रीणाम्

[8] वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया। *मनुस्मृतिः*, 2.67

[9] ओँ नमो नारायणाय, ओँ नमो भगवते वासुदेवाय। *विष्णुस्मृतिः*, 67/2

[10] *विष्णुधर्मोत्तरपुराणम्* 2.88.41

[11] रामास्तु भृगुशार्दूला न प्रदुष्यन्ति कर्हिचित्। मासि मासि रजस्तासां दुष्कृतान्यपकर्षति। सोमस्तासां ददौ शौचं गन्धर्वः शिक्षितां गिरम्। अग्निश्च सर्वमेध्यत्वं तस्मान्निष्कल्पषाः स्त्रियः। ब्राह्मणाः पादतो मेध्या गावो मेध्यास्तु पृष्टतः। अजाश्वौ मुख्यतो मेध्यौ स्त्रियो मेध्यास्तु सर्वतः।। *विष्णुधर्मोत्तरपुराणम्*, 2.33.16-18

[12] *विष्णुस्मृतिः*, 25.12

*तु. मनुस्मृतिः*, 5.148)

*तु. याज्ञवल्क्यस्मृतिः*,1.85-86

अस्वतन्त्रतेति स्वीक्रियते। बाल्ये यौवने वार्धक्ये च ताः यथाक्रमं पितृ-पति-पुत्राधीनास्तिष्ठन्ति। विवाहात् पूर्वं पिता, विवाहोत्तरे काले पतिस्तथा च पत्युर्मृत्योरुत्तरं पुत्रश्च तस्याः रक्षकत्वेन निर्धार्यन्ते[13]।

वैवाहिकं दाम्पत्त्यं जीवनञ्च कीदृशमासीदिति प्रसङ्गो वर्णितोविष्णुधर्मोत्तरपुराणे राम-पुष्करयोः प्रश्नोत्तरमाध्यमेन। उच्यते स्त्री कथमपि अन्यदुपरि निर्भरशीलेति। सतीनार्यः कर्तव्यं तावत् पत्युः उत पुत्रस्य अधीनेन जीवननिर्वाहनम्। किञ्च, पत्या समं सहमृत्युवरणमेव वरम्[14]। अपि चोच्यते यत् द्विः विवाहं न कृत्वा आत्मानं समर्पयति चेत् सा ध्रुवमेव स्वर्गाधिकारिणी भवतीति। अत्रेदमुल्लेख्यं यत् विष्णुधर्मोत्तरपुराणे कारणपञ्चकेन कन्यायाः पुनःविवाहः स्वीकृतः[15]। यस्या विधवाया नार्यो गृहे कोऽपि न तिष्ठति, स स्वकपितुः गृहे आजीवनं यापयेत्।

नारीणां जन्म प्रजननार्थ एव। अर्थात् पुरुषस्योपभोगार्थं पुत्रोत्पादनाय च नारीणां जीवनम्। तासां पृथक्तयाकापि सत्ता नैव शास्त्रेषु स्वीकृता। पातिव्रत्यधर्माय नैके श्लोका रचिताः परं पत्नीव्रताचरणाय कोऽपि पथनिर्देशो नास्ति स्मृतौ। स्मृतिकृतामभिमतमेतदेव यत् पुरुषाणां चरित्रस्याधोगमनं निश्चितमिति कृत्वा नास्ति विधिः कश्चित्। किन्तु नारीणां चरित्ररक्षायै स्मृतिकाराणां महती चिन्ता विद्यते। विष्णुस्मृतौ मनु-याज्ञवल्क्ययो[16]रिव पतिं विना पत्न्याः कोऽप्यधिकारो नाङ्गीकृतः। पत्यनुकूलस्थितिर्हि तासां शिक्षा। पत्न्याः सुरक्षायाः गुरुदायित्वं सम्पूर्णतया पुरुषस्योपरि न्यस्तम्। मनुना आचारस्य प्रशंसनेन तथा चानाचारस्य निन्दया मानवचरित्रनिर्माणमुपरि महद्गुरुत्वमारोपितम्[17]। परं कस्यापि जनस्य चारित्रिकदोषाणाम् अपेक्षया स्त्रियश्चारित्रिकपवित्रता अधिकतया गुरुत्वपूर्णेति शास्त्रकृतामभिमतम्। विष्णुस्मृतावपि असवर्णविवाहविधिः स्वीकृतो वर्तते[18]। बहुपत्नीग्रहणं समाजे स्वीकृतमासीदिति।

पत्यौ मृते सति ब्रह्मचर्यधर्मपालनं, भर्त्रा सहगमनम् अनुगमनं वेति स्त्रीणां धर्मः। पतिसेवा हि तासां करणीयमेव –'पत्यौ जीवति या योषिदुपवासव्रतं चरेत्'[19]। आयुः सा हरते भर्तुर्नरकं चैव गच्छति। अर्थवादरूपेण संयोजितमासीत् वैधव्यावस्थायां ब्रह्मचर्यपालनं कल्याणकारि[20] इति। पत्नी न केवलं पित्रा पत्या पुत्रेण च नियन्त्रिता, सा राज्ञापि। स्त्री व्यभिचारिणीति दोषेण राजा तस्या वधं कुर्यात्। अपरतः, पुराणादिषु विपरीतधर्मि आलोचनमाप्यते। साध्व्याः पत्न्याः कर्तव्यकर्म निरूपयितुम् उच्यते यत् राजा कदापि तस्य प्रभुर्न भवितुमर्हेत्[21]। राजानं प्रति निर्देशोऽयं यथा विष्णुस्मृत्या विरोधीति सत्यम्। स्मृतौ नारी-पुरुषयोः आन्तःसम्पर्को निर्णीतो बभूव समाजेनैव। नारीणां पारतन्त्रस्य स्वरूपमिदं वर्तमानयुगमास्थाय अपि वयम् कष्टेनापि कल्पयितुं न शक्नुमः। अनया भावनया तदानीन्तननारीणाम् अवस्थानं कियत्कष्टप्रदमासीदिति अनुमातुं शक्यते।किन्तु तासाम् एकतः स्वाधीनताया अधिकारः क्षुण्णोऽभवत्, अपरतः प्रायश्चित्तपालने क्वचित् पुरुषवत् पूर्णाधिकारो विवृद्धिं गतः। तथाहि स्त्रियै अपि चान्द्रायणव्रतविधानं प्राप्यते[22]। रजःस्वला कन्या अधिकदोषार्हा यदि रजःस्वलाम् अभिगच्छेत् कोऽपि पुरुषः। स प्रायश्चित्तकर्म कुर्यात्[23]।

तदानीमासीत् स्त्री गृहिणी –'गृहिणी गृहमुच्यते'। तस्याः कर्मक्षेत्रं तावत् गृहमिति कृत्वा स्वाभाविकतया तया अधिकतया परिश्रमः करणीयः। किन्तु दक्षस्मृतौ उच्यते यत् सर्वगुणसम्पन्ना स्त्री देवीस्वरूपा[24]। ननु देवी कथंकारं केनचित् वाध्यते इति चेदुच्यते देवी-लक्ष्म्यादिशिष्टशब्दव्यवहारेणैव नारीजातिं प्रति छलम् अभिव्यज्यते। अतः प्रायः सम्पूर्णस्मृतौ नारीजनान् प्रति विद्वेषभावो नयनयोरापतति। क्वचित् दृश्यमानाः नारीचरित्रसम्पर्किताः प्रशंसासूचकाः श्लोकाः तदानीं शास्त्रकृद्भिः उद्देश्यप्रणोदिततया गदिता इति मन्मतिः।

कन्या विवाहे दानपात्रीति। दानात्मकविवाह एव शास्त्रे वैधरूपेण स्वीकृतः। कन्यादानस्याधिकारित्वं नैवासीत् सर्वेषाम्। पितृ-पितामह-भ्रातृ-मातरश्च कन्यादाने अधिकारिण आसन्। समाजे तदानीमासीत् कन्यकायाः विक्रयप्रथेति विचिन्त्य विष्णुधर्मोत्तरपुराणे कन्यायाः विक्रयो निषिद्धः[25]। कन्या न हि किमपि पण्यवस्तु इति पुराणकृतो मानसिकतापि अत्र स्फुटं काशते। मानविकता अत्र गुरुत्ववहा नारीत्वापेक्षयेति आधुनिकी आसीद्भावना पुराणकृताम्। त्रिः ऋतुदर्शनं यावत् कन्या स्वयंवरा सती चेत्तन्न दोषार्हम्। किन्तु ऋतुत्रयम् उपास्यैव कन्या स्वयं वरं

---

[13]पितृभिर्भ्रातृभिश्चैताः, *मनुस्मृतिः*, 55-62

[14] *विष्णुधर्मोत्तरपुराणम्*, 2.34, 2.41, 2.47

[15] नष्टे मृते प्रव्रजिते क्लीवेऽथ पतितेऽपतौ। पञ्चस्वापत्सु नारीणां परिरन्यो विधीयते। *विष्णुधर्मोत्तरपुराणम्*, 2.87.11

[16] *मनुस्मृतिः*, 5.155-160,

तु. *याज्ञवल्क्यस्मृतिः*, 2.75

[17] *मनुस्मृतिः*, 4.155-158

[18] *तत्रैव* 9.86-87

[19] *विष्णुस्मृतिः* 25.16

[20]मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः। *विष्णुस्मृतिः*, 25.17

[21]नैव राजा प्रभुः क्वचित्। *विष्णुधर्मोत्तरपुराणम्*, 2.33.5

[22] *मनुस्मृतिः*, 11.178

[23] *विष्णुस्मृतिः* 55/2

[24] *दक्षस्मृतिः* 4.4

[25] *विष्णुधर्मोत्तरपुराणम्* 2.87.7

चेतुमलम्। ऋतुत्रये व्यतीते तु प्रभवति आत्मनः सदा[26]। साधारणदृष्ट्या अयं नारीणाम् अधिकारं सूचयति किन्तु सूक्ष्मतया विचार्यते चेदेतत् विवाहाख्यं लक्ष्यं पूरयितुम् उपायविशेषः इति मम मतम्। विवाहयोग्यायाः कन्यायाः कृते उपयुक्तो वरो न प्राप्यते चेत् सा मृत्युं यावत् पितृगृहे एव वसेदिति मनुः [27] । किन्तु वृषलीणां कृते सामान्यरक्षणविधिर्न हि प्रयोज्यः। तथाहि विष्णुस्मृतौ उक्तम् –'पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता। सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यति'[28] इति।

मृतपत्या समम् अनुगमनेन सतीदाहप्रथा परोक्षतया उल्लिखिता इति पण्डिता मन्यन्ते। उच्यते यत् पत्याः मृत्योः परं स्त्री स्वामिना सह समभावेन चितायाम् आत्मानं समर्पयितुम् अलम्[29]। परवर्तिकाले पराशर-शुक्रनीत्योरपि विचारोऽयं प्राप्यते।किमपि सभ्यसमाजं कदापि जीवितं जनम् अग्निना हन्तुं नोपदिशति, परं समाजस्य क्रुरतायाः परिचायकत्वेन बहूनि दिनानि यावदेवन्निरवच्छिन्नतया प्रचलति स्म। राजा राममोहनः स्वकप्रयत्नेन समाजस्य घृण्यविधिमिमं विरुध्य आन्दोलनं प्रारभत। प्रसङ्गतः टीकाकृतो मतमेतत् यत् विधिरयं विकल्पः, यत्र पतिमभिलक्ष्यैव अग्नौ आरोहणं भवति। पत्युः मृत्योः बहुदिवसेभ्यः परं न, तत्क्षणादेवाग्नावात्मानं विसर्जयते सा वधूः। किन्तु गर्भवती नारी यद्यग्नौ चात्मानं विसर्जयितुमिच्छेत्, तर्हि गर्भहननस्य प्रत्यवायदोषेण सा दुष्टा भवेदिति। किञ्च, अबालापत्याम् आरभ्य चण्डालपत्नीः यावत् अयमेव साधारणो धर्मः। बौधायनस्य मतमुल्लिख्य वाशब्दस्यार्थः प्रवज्येति बोध्यः।

स्मृतौ नारीणाम् उपस्थितिस्तथा नामोल्लेखश्च वर्तेते, तद्यथा – विष्णुपत्नी लक्ष्मीः पृथिवी चेति। परं पुराणे वेदस्य आङ्गिकेन नदी मातृत्वेन कल्पिता। तत्र उत्तरप्रान्तीयानां नदीनां वर्णनं समस्ति, यथा वितस्ता[30], चन्द्रभागा, इरावती, विपशा चेति[31]। विशेषेण, वितस्ता भगवता शङ्करेण सह तुलयितेति कृत्वा देवीत्वेनोन्नीता। स्वाभाविकगत्या पूजाप्रसङ्गः पर्यालोचितः। स्मृतौ पृथिव्या लक्ष्मीः स्तुता परं पूजाया उल्लेखो नोपलभ्यते। पुराणे देव्याः पूजाविधिः साङ्गोपाङ्गं वर्ण्यते। क्षत्रियाय विहिते गान्धर्व-राक्षसयोर्विवाहे इन्द्रपत्नीं शचीमुद्दिश्य शचीयागनाम्नैव यागोपदेशो वर्णितः[32]। पूजावसरे शचीमूर्तिः मृत्तिकया निर्मीयते कस्याश्चिन्नद्यास्तीरे। एतेन देवीमूर्तिभावनापि विस्तृतिमलभत इति ज्ञायते।यासां रमणीनां स्वामिनो जीवितास्ताः दिवसत्रयं यावत् रक्तिमवर्णीयं वस्त्रं परिदधति स्मेति। किञ्च, गौरीपूजाया उल्लेखः सर्ततोरूपेण विष्णुस्मृतौ प्राप्यते[33]।

यद्यपि स्त्री-पुरुषौ समाजस्यात्यावश्यकीयं तत्त्वद्वयम्। नारी यथा प्रसूते, तस्मान्नारी मानवोत्पत्तेः प्रधानं कारणम्। पुरुषोऽपि स्त्रियं विहाय पूर्णतां नैतीति कृत्वा विवाहात् परं सा अर्धाङ्गिनीति परिचीयते। उच्यते शास्त्रे गृहिणी गृहमुच्यते। रामायणे रावणस्य तथा च महाभारते दुर्योधनस्य वृत्तात् प्रमाणीभवति यत् स्त्रीजनानामपमानं मरणतुल्यम्। समाजे तेषाम् अवस्थानविश्लेषणेनैव अर्थनैतिक-राजनैतिकादिदिशा तेषां स्थितिरनुमानसाध्या। स्त्रीणामवस्थानवर्णनया वक्तुं शक्यं यत् स्त्रीणां सामाजिकमर्यादा पुराणादपि न्यूनगुरुत्वपूर्णोपेता स्मृतिकाले। तेषामवदानमपि समाजे सामान्यमेवासीत्। नार्यः शिक्षारहितं स्वाधीनताहीनं जीवनं यापयति। ताश्च सर्वदा कर्तव्यबोधेनाबद्धा आसन्। विष्णुधर्मोत्तरकालीनसमाजादपेक्षया विष्णुस्मृतिकालीनानां नारीणामवस्थानम् अधिकांशेनोपेक्षितमासीदित्यनुमीयते। स्मृतौ ब्राह्मण्यवादस्य प्राधान्यादपि पुराणे आञ्चलिकव्रताचार-गार्हस्थ्यधर्मयोः सहावस्थानं वर्तते। ताः पुण्यार्जनस्यावकाशः प्राप्यते। एकतो यथा सर्वा नार्यः स्मृत्या प्रत्याख्याता आसन्, तथैव अपरतः पुराणे धनि-दरिद्रादिसाधारणाः, वर्णादिनार्यश्च देवीरूपेण उन्नीता अभवन्। परम् अत्रैव स्पष्टं यत् स्त्रीधर्म इत्यनेन नारीणां पातिव्रत्यमेव अवबुध्यते विष्णुस्मृतौ तथा विष्णुधर्मोत्तरपुराणे चेति। वर्तमाने पुरुषतान्त्रिके समाजे स्त्रीणां कृते शिक्षास्वतन्त्रता सर्वेषु विषयेषु अधिकाराश्चेति समानतया निर्धार्यन्ते। साम्प्रतं न केवलं स्वकीये गृहे, समाजनिर्मितौ, देशसमृद्धौ च नार्यः गुरुत्ववहं स्थानम् अधिकुर्वन्ति। परं प्राचीने काले केवलं गेहे एव तासां प्रभावः समासीदिति शास्त्रकृतः आमनन्ति। तथाहि विष्णुस्मृत्यादिग्रन्थानाम् उपादेयत्वम् अद्यावधि अस्ति न वेति विचार्यम्।

## परिशीलिता ग्रन्थानुक्रमणी

### मौलिकग्रन्थाः

1. Nanda Pandita. Viṣṇu Smṛtiwith the commentary Keśavavaijayantī. (Ed.) V. Krishnayaacharya. Madras: The Adyar library and research centre, 1964. Volume- I, II. Print.

[26] *विष्णुस्मृतिः* 24.40

[27] *मनुस्मृतिः* 9.89

[28] *विष्णुस्मृतिः* 24.41

[29] मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा। *विष्णुस्मृतिः*, 25.14

[30] *विष्णुधर्मोत्तरपुराणम्* 1.164.23-24

[31] तत्रैव 1.2, 1.69.11-13, 1.164.23-26, 1.167, 1.170.4, 1.207.40-65, 1.215.44-52, 2.22.158,

[32] गान्धर्वराक्षसौ श्रेष्ठौ क्षत्रियस्यैव भार्गव। पूर्वं विवाहात् कर्तव्यः शचीयागो भृगुत्तमः। *विष्णुधर्मोत्तरपुराणम्*, 2.87.21

[33] *विष्णुधर्मोत्तरपुराणम्* 2.35.71

2. Olivelle, Patrick. The law code of Viṣṇu (A critical edition and annoted translation of the Vaiṣṇava Dharmaśāstra). U.S.A.: Harvard University Press, 2009. Print.
3. The Viṣnudharmottara Purāṇa. Delhi: Nag Publishers, 1998. Volume- I, II. Print.

## गौणोत्सग्रामाः

1. Kane PV. History of Dharmaśāstra**.** Poona: Bhandarkar Oriental Research Institute, 1968. Volume- I, II, V. Print.
2. Kramrisch, Stella. The Vishnudharmottara (Part III) Calcutta: Calcutta University Press, 1928. Print.
3. Tarkalankara, Chandrakanta, ed. Parāśarasmṛti. I, II, III vols. Kolkata: The Asiatic Sciety, 1973, 1974. Print.
4. Shah, Priyabala, Viṣṇudharmottara Purāṇa. Delhi: Parimal Publications, 2005. Print.